6.2.4 Effectiveness of various bodies/cells/committees is evident through minutes of meetings and implementation of their resolutions

**विविधसमितीनां कार्यविवरणेभ्यः , निर्णयानां क्रियान्वयनात् च ज्ञायते यत् संस्थायाः विविधनिकायाः / विभागाः / समितयः प्रभावितया फलोन्मुखतया च कार्यतत्पराः सन्ति इति।**

Answer:

यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् तथा सर्वे निकायाः विभागाः समितयश्च समग्रस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य दूरदृष्टेः अनुरूपं ध्येयानाम् आपूर्तये च संस्थिताः सन्ति। करचरणाद्यङ्गानां शरीरसंरचनायां यादृशी भूमिका वर्तते तादृशी एव भूमिका विविधानां संकायानां विभागानां विभिन्नसमितीनां च वर्तते। अवयववैकल्ये न्यूनतायां वा यथा शरीरं न शोभते तथैव विविधानां निकायानां विभागानां समितीनां सुचारुरूपेण सङ्घटनाभावे विश्वविद्यालयः अपि न शोभते। अतः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः अमीषां सक्रियतायाः विषये विशिष्टं ध्यानं वहति। विशिष्य विकेन्द्रीकरणप्रशासनप्रणाली वर्तते इत्यतः अमीषां मध्ये सामञ्जस्यम् अपि संस्थापयति।

विकेन्द्रीकरणप्रशासनप्रणालीं समाश्रित्य संरचितस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य विविधनिकायाः विभागाः समितयश्च क्रियाशीलाः सन्तः विश्वविद्यालयस्य अभिवृद्धये सन्ततं चेष्टन्ते। विश्वविद्यालयस्य कार्यपरिषदः सभाः नियतरूपेण प्रतिवर्षं जायन्ते यत्र हि विकासपरनीतयः निर्णीयन्ते। निर्धारितनिर्णयानां क्रियान्वयनदृष्ट्या अपि इयं परिषत् प्रधानभूमिकां निर्वहति। विद्यात्परिषत् विश्वविद्यालयीयशिक्षायाः , शिक्षणप्रक्रियायाः , प्रशिक्षणस्य, परीक्षायाः , अनुसन्धानकार्यक्रमाणां च स्तरपरिरक्षणकर्मणि कार्यरता भवति। अस्याः संसूचनाः विभागमुखेन समितिमुखेन च क्रियान्विताः भवन्ति। अध्ययनमण्डलं विश्वविद्यालयस्य विभिन्नपाठ्यक्रमाणां निर्माणं करोति।

विश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनप्रकोष्ठः शैक्षिकेषु प्राशासनिकेषु च क्रियाकलापेषु गतिशीलतायाः संवर्धनाय एकस्याः प्रणाल्याः विकासं करोति। आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य प्राथमिकोद्देश्येषु संस्थायाः गुणवत्तासंवर्धनाय विश्वविद्यालयेन अनुसर्तव्याः मार्गोपायाः प्रमुखाः सन्ति। काले काले सभासङ्गोष्ठ्यादीनाम् आयोजनेन च विश्वविद्यालयस्य विकासाय प्रयतते । तदीयप्रतिवेदनेषु विश्वविद्यालयस्य गुणवत्तानिर्धारकमानकानां क्रियान्वयनेन प्राप्तस्य फलस्य विवरणम् उल्लिखितं वर्तते। विश्वविद्यालयस्य सर्वेऽपि क्रियाकलापाः छात्राणां विकासाय पूरकाः स्युरिति सङ्कल्पेन आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य प्रतिष्ठापनं विहितम् अस्ति। आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य संसूचनाः आश्रित्य सक्रियाणां विभागसमित्यादीनां कार्येषु सञ्जाताः प्रगतयः यथा –

1. विश्वविद्यालये च छात्रकेन्द्रितवातावरणं विद्यते येन शिक्षणाधिगमप्रक्रियायां प्रौद्योगिक्याः समावेशः क्रमशः जायमानः वर्तते।

2. गुणवत्तासम्बद्धेषु तत्वेषु छात्राणाम् अभिभावकानां सामाजिकानां च प्रतिक्रियाः स्वीकृत्य शिक्षणाधिगमप्रक्रियायाः संवर्धनदिशि विश्वविद्यालयः सन्ततम् अग्रेसरः वर्तते।
3. उच्चशिक्षायाः विशिष्य शास्त्रशिक्षणस्य परम्परागतपाठ्यक्रमाणां च अभिवर्धने विद्यमानान् मानकान् विनिश्चित्य तेषां पूर्णशः क्रियान्वयनाय यत्नः विधीयते।
4. विश्वविद्यालयस्य गुणवत्तायाः संवर्धनाय महाविद्यालयीयैः विश्वविद्यालयायैः च सह सम्मील्य काले काले कार्यशालानां सङ्गोष्ठीनां सभासमारोहाणाम् आयोजनं क्रियते।
5. विश्वविद्यालयस्य विभागाः फलोन्मुखतया कार्यतत्पराः भवितुम् अपेक्षितानां भौतिकसंसाधनानां व्यवस्थापनं कुर्वन्ति।
6. आन्तरिकगुणवत्ताश्वासनप्रकोष्ठः विकासस्य माध्यमरूपेण कार्यं करोति इत्यतः सर्वे विभागाः समितयः कार्यतत्पराः विद्यन्ते।
7. नियतरूपेण विभागानां पर्यवेक्षणं प्रकोष्ठेन विधीयते इत्यतः विभागानां कार्यतत्परतायाः मूल्याङ्कनं जायमानं वर्तते।

परीक्षासमितिः , शोधसमितिः , ग्रन्थालयसमितिः , वित्तसमितिः , छात्रावाससमितिः , क्रीडासमितिः , कलासंस्कृतिसम्बद्धसमितिः इत्येवं बह्व्यः समितयः सदा सक्रियाः एव सन्तिष्ठन्ते। आसां अन्तिमाः निर्णयाः स्वीक्रियन्ते। छात्रपरिदेवनानिवारणप्रकोष्ठः , महिलाकक्षः इत्यादयः अपि समस्यानां निवारणाय कार्यं कुर्वन्ति। एवं सर्वे विभागसमितिनिकायाः फलदाः क्रियापराश्च सन्ति।

सामान्यतः प्रतिवर्षं शैक्षिकसत्रारम्भात् आसत्रान्तं कार्यक्रमाणां सञ्चालनाय विविधाः समितयः कुलपतीना संरच्यन्ते। वार्षिकोत्सवस्य संस्कृतोत्सवस्य वाग्वर्धिनीमहोत्सवस्य राष्ट्रियसङ्गोष्ठ्याः क्रीडाप्रतियोगितादीनां च आयोजनाय पार्थक्येन समितयः रच्यन्ते। कार्यक्रमसमितिः प्रधानकार्यक्रमाणां निर्वहणाय कार्यं करोति। एषा समितिः कार्यक्रमाणां प्रतिवेदनमपि समर्पयति। वेदिकासमितिः वेदिकानिर्माणादिषु कार्येषु मार्गदर्शनं विदधाति। सभासञ्चालनसमितिः सभाकार्यक्रमाणां सञ्चालनाय व्यवस्थां करोति। पुरस्कारवितरणसमितिः छात्राणां कृते स्पर्धादिषु प्राप्तपुरस्काराणां वितरणाय व्यवस्थां करोति। एवमेव अनुशासनसमितिः अनुशासनपरिरक्षणकर्मणि साहाय्यं विदधाति। स्वच्छतासमितिः परिसरस्य स्वच्छतापरिरक्षणे प्रतिपदं मार्गदर्शनं करोति। एवं विंशत्यधिकाः समितयः सक्रियाः सन्ति। विश्वविद्यालयस्य सङ्कायप्रमुखाः विभागाध्यक्षाश्च सम्बद्धसङ्कायानां विभागानां कार्यनिर्वहणादिकम् अवलोकयन्ति।